पावकप्रेरितः सोऽथ क्रमादूर्द्ध्वपथे चरन् ।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥
पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा ।
आविर्भावयतीत्येवं पञ्चधा कीर्त्त्यते बुधैः ॥"
"नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥"
अयन्तु योगिसंवेद्य एव । अस्य अवस्थादिकं यदुक्तं हठयोगप्रदीपिकायाम् । ४ । ६५-१०७ ।
"अशक्यतत्त्वबोधानां मूढ़ानामपि संमतम् ।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ॥
श्रीआदिनाथेन सपादकोटि-
लयप्रकाराः कथिता जयन्ति ।
नादानुसन्धानकमेकमेव
मन्यामहे मुख्यतमं लयानाम् ॥
मुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम् ।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः ॥
श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्य्यम् ।
शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते नादः ॥
आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादावस्थाचतुष्टयम् ।
अथारम्भावस्था ।
ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसम्भवः ।
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः ॥
दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
संपूर्णहृदयः शून्य आरम्भो योगवान् भवेत् ॥
अथ घटावस्था ।
द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढ़ासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्द्दश्च भेरीशब्दस्तदा भवेत् ॥
तृतीयायां तु विज्ञेयो विहायोमर्द्दलध्वनिः ।
महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम् ॥
चित्तानन्दं तदा जित्वा सहजानन्दसम्भवः ।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्ज्जितः ॥
रुद्रग्रन्थिं यदा भित्वा शर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम् ।
सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत् ॥
अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम् ।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते ॥
राजयोगमजानन्तः केवलं हठकर्म्मिणः ।
एतानभ्यासिनो मन्ये प्रयासफलवर्ज्जितान् ॥
उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम संमतम् ।
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम् ॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः ॥
नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्द्धमानम् ।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः ॥
कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः ।
तत्र चित्तं स्थिरीकुर्य्याद्यावत्स्थिरपदं व्रजेत् ॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम् ।
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत् ॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।
ततोऽभ्यासे वर्द्धमाने श्रूयते सूक्ष्मसूक्ष्मकः ॥
आदौ जलधिजीमूतभेरीझर्झरसम्भवाः ।
मध्ये मर्द्दलशङ्खोत्था घण्टाकाहलजास्तथा ॥
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः ।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः ॥
महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ ।
तत्र सूक्ष्मात् सूक्ष्मतरं नादमेव परामृशेत् ॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत् ॥
यत्र कुत्रापि वा नादे लगति प्रथमं मनः ।
तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते ॥
मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा ।
नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षते ॥
मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः ।
नियमने समर्थोऽयं निनादनिशिताङ्कुशः ॥
बद्धं तु नादबन्धेन मनः संत्यक्तचापलम् ।
प्रयाति सुतरां स्थैर्य्यं छिन्नपक्षः खगो यथा ॥
सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता ॥
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च ॥
अन्तरङ्गस्य यमिनो वाजिनः परिघायते ।
नादोपास्तिरतो नित्यमवधार्य्या हि योगिना ॥
बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारणात् ।
मनःपारदमाप्नोति निरालम्बाख्यखेऽटनम् ॥
नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः ।
विस्मृत्य सर्व्वमेकाग्रः कुत्रचिन्नहि धावति ॥
काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति ।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते ॥
घण्टादिनादसक्तस्तब्धान्तःकरणहरिणस्य ।
प्रहरणमपि सुकरं शरसन्धानप्रवीणश्चेत् ॥
अनाहतस्य शब्दस्य ध्वनिर्य्य उपलभ्यते ।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः ।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ॥
तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते ।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते ॥
यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा ।
यस्तत्त्वान्तो निराकारः स एव परमेश्वरः ॥
सर्व्वे हठलयोपाया राजयोगस्य सिद्धये ।
राजयोगसमारूढ़ः पुरुषः कालवञ्चकः ॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः ।
उन्मनी कल्पलतिका सद्य एव प्रवर्त्तते ॥
सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः ।
निरञ्जने विलीयेते निश्चितं चित्तमारुतौ ॥
शङ्खदुन्दुभिनादञ्च न शृणोति कदाचन ।
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम् ॥
सर्व्वावस्थाविनिर्मुक्तः सर्व्वचिन्ताविवर्ज्जितः ।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ॥"*॥
स्वनामख्यातमुनिविशेषः । अयन्तु ईश्वरमुनेः पुत्त्रः । न्यायतत्त्वयोगरहस्ययोः प्रणेता । अस्य वासस्थानं दाक्षिणात्यप्रदेशः ॥)

नादेयं, क्ली, ( नद्या नदस्य वा इदं तत्र भवं वा । नदी वा नद+ढक् । ) सैन्धवलवणम् । इति रत्नमाला ॥ सौवीराञ्जनम् । इति राजनिर्घण्टः ॥ नदीनदसम्बन्धिजलादौ, त्रि । यथा,—
("नादेयं नादेयं शरदि वसन्ते च नादेयम् ।
पानीयं पानीयं शरदि वसन्ते च पानीयम् ॥"
इति वैद्यकराजवल्लभीयद्रव्यगुणे ॥ )
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ॥"
अस्य गुणाः । यथा, भावप्रकाशे ।
"नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥"
(न आदेयमिति विग्रहे अग्राह्ये, त्रि । यथा,—
"सौगन्ध्यहीनं नादेयं पुष्पं कान्तमपि क्वचित् ॥")

नादेयः, पुं, ( नद्यां भवः । नदी+ढक् । ) काशतृणम् । वानीरवृक्षः । इति राजनिर्घण्टः ॥

नादेयी, स्त्री, ( नद्यां भवा । "नद्यादिभ्यो ढक् ।" ४।२।९७। इति ढक् ततो ङीप् । ) अम्बुवेतसः । भूमिजम्बुका । वैजयन्तिका । इत्यमरः । २ । ४ । ६५ ॥ नागरङ्गः । जवा । बकुलः । इति मेदिनी । ये, ८६ ॥ अग्निमन्थः । (अस्याः पर्य्यायो यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) काकजम्बूः । इति राजनिर्घण्टः ॥

नाध, ऋ ङ नाथे । इति कविकल्पद्रुमः ॥ ( भ्वा-आत्म-सकं-सेट् । ) ऋ, अननाधत् । ङ, नाधते । नाथो इहाशीरैश्वर्य्यार्थनानि । इति दुर्गादासः ॥

नाना, व्य, ( न+"विनञ्भ्यां नानाञौ न सह ।" ५ । २ । २७ । इति नाञ्प्रत्ययः । ) अनेकार्थम् । ( यथा, मनुः । ९ । १४८ ।
"बह्वीषु चैकजातानां नानास्त्रीषु निबोधत ॥")
उभयार्थम् । विनार्थम् । इति मेदिनी । ने, ४५ ॥
( यथा, मुग्धबोधे ।
"न नाना शम्भुना रामात् वर्द्धनाथोऽव्ययो- [दरः ॥")

नानाकन्दः, पुं, ( नाना बहवो कन्दा यस्य । ) पिण्डालुः । इति राजनिर्घण्टः ॥ बहुमूलञ्च ॥ ( बहुमूलयुक्ते, त्रि ॥ )

नानाध्वनिः, पुं, ( नाना ध्वनिर्यत्र । नानाविधो ध्वनिर्वा । ) काहलावेणुवीणादिशब्दः । इति हारावली । २४६ ॥

नानारूपः, त्रि, ( नाना रूपाणि यस्य । ) अनेकप्रकारः । तत्पर्य्याय । विविधः २ बहुविधः ३ पृथग्विधः ४ । इत्यमरः । ३ । १ । ९२ ॥ (यथा मनुः । ९ । ३८ ।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥"
नाना रूपाणि इति विग्रहे । बहुविधरूपे, क्ली । यथा, गोः रामायणे । ३ । ९ । २१ ।
"नानारूपैर्विरूपाक्ष रूपैरशुभदर्शनाः ॥")